वृक्षदलवद्भवति। तस्य पुष्पं पीतरक्तवर्णं उपर्य्यधः स्थूलसूक्ष्मदशदलं दीर्घवृन्तं दशदीर्घकेशरमध्यं ईषत्सुगन्धयुक्तञ्च जायते। तत्फलं शिम्बीसदृशं पुष्पं सर्व्वकाले सुलभं वर्षाकाले प्रचुरं भवति। तदुत्पत्तिस्तस्य मूलतो वीजाच्च भवति इति लोकप्रसिद्धम्॥

कृष्णचूड़िका, स्त्री, (कृष्णा चूड़ा अग्रं यस्याः। ततः कप् ततष्टाप् अत इत्वञ्च।) गुञ्जा। इति राजनिर्घण्टः॥ (कुँच्फल इति भाषा॥)

कृष्णचूर्णं, क्ली, (कृष्णस्य लोहस्य चूर्णम्। दग्धाल्लोहाग्निःसृतकीट्टमित्यर्थः।) लौहमलम्। इति राजनिर्घण्टः॥

कृष्णजटा, स्त्री, (कृष्णा कृष्णवर्णा जटा यस्याः।) जटामांसी। इति रत्नमाला॥

कृष्णजीरकः, पुं, (कृष्णः कृष्णवर्णो जीरकः।) कृष्णवर्णस्थूलजीरकः। केलेजीरा इति भाषा। तत्पर्य्यायः। सुषवी २ कारवी ३ पृथ्वी ४ पृथुः ५ काला ६ उपकुञ्चिका ७। इत्यमरः॥ सुशवी ८ कुञ्चिका ९। इति तट्टीकायां नयनानन्दः॥ उपकुञ्चिः १०। इति रत्नमाला॥ कृष्णा ११ जरणा १२ शाली १३ बहुगन्धा १४। पृथुका १५ पृथिवी १६ भेषजम् १७। इति शब्दरत्नावली॥ अपि च।

"कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः।
कण्याजाजी तु सुषवी कालिका चोपकालिका॥
पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुञ्चिका।
उपकुञ्ची च कुञ्ची च वृहज्जीरक इत्यपि॥
जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु।
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत्॥
ज्वरघ्नं पाचनं बल्यं वृष्यं रुच्यं कफापहम्।
चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत्"॥

इति भावप्रकाशः॥ अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफशोथजीर्णज्वरनाशित्वम्। रुचिचक्षुर्हितकारित्वम्। ग्राहित्वञ्च। इति राजनिर्घण्टः॥ स तु स्थूलसूक्ष्मभेदेन द्विधा॥

कृष्णतण्डुला, स्त्री, (कृष्णः तण्डुलो वीजं यस्याः।) कर्णस्फोटालता। इति राजनिर्घण्टः॥

कृष्णताम्रं, क्ली, (कृष्णं ताम्रम्। "वर्णो वर्णेन"। २। १। ६९। इति कर्म्मधारयः।) गोशीर्षचन्दनम्। इति शब्दमाला॥

कृष्णतारः, पुं, (कृष्णा तारा यस्य।) हरिणः। इति राजनिर्घण्टः॥

कृष्णत्रिवृता, स्त्री, (कृष्णा त्रिवृता।) कृष्णवर्णा त्रिवृत्। काल तेउड़ी इति भाषा॥ तत्पर्य्यायः। श्यामा २ पालिन्दी ३ कालमेषिका ४ काला ५ मसूरविदला ६ अर्द्धचन्द्रा ७ सुषेणिका ८। इति जटाधरः॥ (अस्या गुणा यथा,

कषायत्वम्। मधुरत्वम्। रूक्षत्वम्। विपाकेकटुकत्वम्। कफपित्तप्रशमकारित्वम्। रूक्षत्वात् वातकोपनत्वञ्च॥ इति चरके कल्पस्थाने ७ अध्याये॥)

कृष्णदन्ता, स्त्री, (कृष्णः कृष्णवर्णो दन्तः शिखरदेशो यस्याः।) काश्मरीवृक्षः। इति राजनिर्घण्टः॥ (कृष्णदन्तविशिष्टे, त्रि। दन्तस्तु मद्यपानादिना कृष्णत्वं प्राप्नोति॥)

कृष्णदेहः, पुं, (कृष्णः कृष्णवर्णो देहो यस्य।) भ्रमरः। इति सारस्वतः॥ कृष्णवर्णशरीरे, त्रि॥

कृष्णद्वैपायनः, पुं, (द्वीपे भव इत्यण्। यद्वा द्वीपः अयनं उत्पत्तिस्थानं यस्य। प्रज्ञाद्यण्। कृष्णश्चासौ द्वैपायनश्चेति।) वेदव्यासः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते १। १०५। १३।

"ततस्तस्मिन् प्रतिज्ञाते भीष्मेण कुरुनन्दन!।
कृष्णद्वैपायनं काली चिन्तयामास वै मुनिम्"॥

अस्य यमुनाद्वीपोत्पत्तिकथा यथा तत्रैव १। १०५। ७—१४।

"धर्म्मयुक्तस्य धर्म्मार्थं पितुरासीत्तरी मम।
सा कदाचिदहं तत्र गता प्रथमयौवने॥
अथ धर्म्मविदां श्रेष्ठः परमर्षिः पराशरः।
आजगाम तरीं धीमांस्तरिष्यन् यमुनां नदीम्॥
स तार्य्यमाणो यमुनां मामुपेत्याब्रवीत्तदा।
सान्त्वपूर्व्वं मुनिश्रेष्ठः कामार्त्तो मधुरं वचः॥
तमहं शापभीता च पितुर्भीता च भारत!।
वरैरसुलभैरुक्ता न प्रत्याख्यातुमुत्सहे॥
अभिभूय स मां बालां तेजसा वशमानयत्।
तमसा लोकमावृत्य नौगतामेव भारत!॥
मत्स्यगन्धो महानासीत् पुरा मम जुगुप्सितः।
तमपास्य शुभं गन्धमिमं प्रादात् स मे मुनिः॥
ततो मामाह स मुनिर्गर्भमुत्सृज्य मामकम्।
द्वीपेऽस्या एव सरितः कन्यैव त्वं भविष्यसि॥
पाराशर्य्यो महायोगी स बभूव महानृषिः।
कन्यापुत्त्रो मम पुरा द्वैपायन इति श्रुतः"॥

अन्यत् विवरणादिकमस्य व्यासशब्दे द्रष्टव्यम्॥)

कृष्णधत्तूरकः, पुं, (कृष्णवर्णो धत्तूरकः।) कृष्णवर्णधुस्तूरः। कालधुतुरा इति भाषा। तत्पर्य्यायः सिद्धः २ कनकः ३ सचिवः ४ शिवः ५ कृष्णपुष्पः ६ विषारातिः ७ क्रूरधूर्त्तः ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कान्तिकारित्वम्। व्रणार्त्तित्वग्दोषखर्ज्जुकण्डूतिज्वरभ्रमनाशित्वञ्च॥ "सितनीलकृष्णलोहितपीतप्रसवाश्च सन्ति धत्तूराः। सामान्यगुणोपेतास्तेषु गुणाढ्यस्तु कृष्णकुसुमः स्यात्"॥ इति राजनिर्घण्टः॥

कृष्णपर्णी, स्त्री, (कृष्णवर्णानि पर्णानि यस्याः।) कालतुलसी। इति रत्नमाला॥

कृष्णपक्षः, पुं, (कृष्णस्तमसावृतश्चन्द्रक्षयात्मकः पक्षः।) असितपक्षः। स तु प्रतिपदाद्यमावास्यान्तानि पञ्चदश दिनानि। यथा, तिथ्यादितत्त्वम्॥

"तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि।
चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः॥
पक्षत्याद्यास्तु तिथयः क्रमात् पञ्चदश स्मृताः।
दर्शान्ताः कृष्णपक्षे ताः पूर्णिमान्ताश्च शुक्लके"॥

कृष्णपाकः, पुं, (पच्यतेऽसौ। पच+घञ्। पाक फलम्। कृष्णः कृष्णवर्णः पाकः फलं यस्य।) करमर्द्दः। इति शब्दरत्नावली॥

कृष्णपाकफलः, पुं, (कृष्णपाकरूपं फलं यस्य।) करमर्दकः। इत्यमरः। २। ४। ६७॥

कृष्णपिङ्गला, स्त्री, ("वर्णो वर्णेन"। २। १। ६९। इति कर्म्मधारयः।) दुर्गा। इति त्रिकाण्डशेषः॥ (कृष्णपिङ्गलवर्णयुक्ते, त्रि।

ॐ "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्द्धलिङ्गं विरूपाक्षं विश्वरूपं नमो नमः"॥)

कृष्णपिण्डीतकः, पुं, (कृष्णः पिण्डीतकः। नित्यकर्म्मधारयः।) वृक्षविशेषः। तत्पर्य्यायः। वराहः २ कृष्णपिण्डीरः ३। इति रत्नमाला॥

कृष्णपिण्डीरः, पुं, (कृष्णः पिण्डीरः।) कृष्णपिण्डीतकवृक्षः। इति रत्नमाला॥

कृष्णपिपीली, स्त्री, (कृष्णा पिपीली।) कृष्णवर्णपिपीलिका। कालपिपीड़ा इति भाषा। तत्पर्य्यायः। स्थूला २ वृक्षरुहा ३। इति राजनिर्घण्टः॥

कृष्णपुष्पः, पुं, (कृष्णं पुष्पं यस्य।) कृष्णधत्तूरकः। इति राजनिर्घण्टः॥ (कृष्णधत्तूरशब्देऽस्य पर्य्याया ज्ञेयाः॥)

कृष्णपुष्पी, स्त्री, (कृष्णपुष्प+जातित्वात् ङीष।) प्रियङ्गुवृक्षः। इति शब्दचन्द्रिका॥

कृष्णफलः, पुं, (कृष्णं उग्रं कुत्सितं वा फलं अस्य।) करमर्द्दकः। इत्यमरटीकायां भरतः॥

कृष्णफलपाकः, पुं, (कृष्णं फलरूपेण पाको यस्य।) करमर्दकः। इति द्विरूपकोषः॥

कृष्णफला, स्त्री, (कृष्णं फलं यस्याः।) सोमराजी। इत्यमरः। २। ४। ९६॥ (कोलशिम्बी। आल्कुशी इति भाषा। छोट जाम इति भाषा। अस्याः पर्य्याया यथा॥

"सूक्ष्मकृष्णफला जम्बू दीर्घपत्रा च मध्यमा"॥

इति वैद्यकरत्नमालायाम्॥ कोलशिम्बिः॥ सुवराशेण्डि इति भाषा॥ अस्याः पर्य्याया। यथा,—

"कोलशिम्बिः कृष्णफला तथा पर्य्यङ्कपट्टिका"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

कृष्णभूमः, पुं, (कृष्णा कृष्णवर्णा भूमिर्मृत्तिका यत्र देशे। समासे अच्।) कृष्णवर्णमृत्तिकायुक्तो देशः। इति हेमचन्द्रः॥

कृष्णभूमिजा, स्त्री, (कृष्णाया भूमेर्जायते इति। जन+डः। ततष्टाप्।) गोमूत्रिकाढ्यम्। इति राजनिर्घण्टः॥

कृष्णभेदा, स्त्री, (कृष्णवर्णेन भेदश्छेदोऽस्याः।) कटुका। इति राजनिर्घण्टः॥ (अस्याः पर्य्याया यथा॥

"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

कृष्णभेदी, स्त्री, (कृष्णेन वर्णेन भेदोऽस्याः। गौरादित्वात् ङीष्।) कटुकी। इत्यमरः। २। ४। ८६॥ (कटुकीशब्देऽस्या गुणपर्य्याया बोद्धव्याः।)

कृष्णमुद्गः, पुं, (कृष्णः कृष्णवर्णः निकृष्टो वा मुद्गः वनजातत्वात्।) मुद्गविशेषः। कालमुग् इति भाषा। तत्पर्य्यायः। वासन्तः २ माधवः ३ सुराष्ट्रजः ४। अस्य गुणाः। त्रिदोषदाहनाशित्वम्। मधुरत्वम्। लघुत्वम्। दीपनत्वम्। पथ्यत्वम्। वल-